# गणेशपञ्चरत्नम्

श्री शङ्कराचार्य

March 18, 2008

# ॐ गं गणपतये नमः

# गणेशपञ्चरत्नम् स्तोत्रम्

## शङ्कराचार्य विरचितम्

मुदाकरात्तमोदकं सदाविमुक्तिसाधकम्
कलाधरावतंसकं विलासिलोकरक्षकम्
अनायकैकनायकं विनाशितेऽभदैत्यकम्
नताशुभाशुनाशकं नमामि तं विनायकम् ॥ १ ॥

नतेतरातिभीकरं नवोदितार्कभास्वरम्
नमत्सुरारिनिर्जरं नताधिकापदुद्धरम्
सुरेश्वरं निधीश्वरं गजेश्वरं गणेश्वरम्
महेश्वरं तमाश्रये परात्परं निरन्तरम् ॥ २ ॥

समस्तलोकशङ्करं निरस्तदैत्यकुञ्जरम्
दरेतरोदरंवरं वरेभवक्त्रमक्षरम्
कृपाकरं क्षमाकरं मुदाकरं यशस्करम्
मनस्करं नमस्कृतां नमस्करोमि भास्वरम् ॥ ३ ॥

अकिञ्चनार्तिमार्जनं चिरन्तनोक्तिभाजनम्
पुरारिपूर्वनन्दनं सुरारिगर्वचर्वणम्
प्रपञ्चनाशभीषणं धनञ्जयाधिभूषणम्
कपोलदानवारणं भजे पुराणवारणम् ॥ ४ ॥

नितान्तकान्तदन्तकान्तिमन्तकान्तकात्मजम्
अचिन्त्यरूपमन्तहीनमन्तरायकृन्तनम्
हृदन्तरेनिरन्तरं वसन्तमेवयोगिनाम्
तमेकदन्तमेकमेव चिन्तयामि सन्ततम् ॥ ५ ॥

महागणेशपञ्चरत्नमादरेण योऽन्वहम्
प्रजल्पति प्रभातके हृदिस्मरन् गणेश्वरम्
अरोगतामदोषतां सुसाहितिं सुपुत्रताम्
समाहितायुरष्टभूतिमप्युपैति सोऽचिरात् ॥ ६ ॥

********************गणेशपञ्चरत्नम् समाप्तम्****************

Please send corrections to Raman.K.R,Kizhakkedath Mana,Mannampatta.Ph:-
09447963680

Last updated March 18, 2008